# केन्द्रीय-विद्यालय सीतापुरम्

**केन्द्रीयः विद्यालय: सीतापुरम् प्रथमा पाली**

**आवधिक-मूल्यांकनम् द्वितीयम् 2018- 2019**

**कक्षा- अष्टमी संस्कृतम्**

**अवधि:- होरासार्धकम्** **अङ्का: - चत्वारिंशत्**

**छात्रस्य नाम-.........................** **अनुक्रमांक:.......................**

**कक्षानुभागश्च-.............** **दिनांक: दिवसश्च .........................**

**निरीक्षकस्य हस्ताक्षरम्-.............** **परीक्षकस्य हस्ताक्षरम्-..............**

**निर्देशा:-**

प्रश्नपत्रमिदम् चतुर्षु खण्डेषु विभक्तम् अस्ति ।

उत्तराणि अस्मिन्नेव प्रश्नपत्रे लेखितव्यानि ।।।

समस्ता: प्रश्ना: अनिवार्या: सन्ति।

**खण्डानि:-**

**खण्डः 'क' अपठित-अवबोधनम् (6)**

**खण्डः 'ख'- रचनात्मक-लेखनम् (8)**

**खण्डः 'ग'- अनुप्रयुक्त-व्याकरणम् (12)**

**खण्डः 'घ'- पठित-अवबोधनम् (14)**

## खण्डः 'क' (अपठित-अवबोधनम्) (6)

**प्रश्नः1.** अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत --- [6]

स्वास्थ्यलाभाय प्रतिदिनं व्यायाम: करणीयः | यः व्यायामं करोति,सः आपत्काले साहसं न त्यजति | रक्तसंचारः अपि सम्यक् भवति | इन्द्रियाणि स्वस्थानि भवन्ति | जठराग्निः दीप्तः भवति | उदरं न परिवर्धते | मस्तिष्कं तीव्रम् भवति |

I. एकपदेन उत्तरत - [1/2x4=2]

1. स्वास्थ्यलाभाय प्रतिदिनं किं करणीयः?उत्तरम् -..............................................|
2. कानि स्वस्थानि भवन्ति ? उत्तरम् -.............................................|
3. रक्तसंचारः कीदृशः भवति ? उत्तरम् -.............................................|
4. किं दीप्तः भवति ? उत्तरम् -.............................................|

II. एकवाक्येन उत्तरत - [1x2=2]

1. यः व्यायामं करोति,सः कीदृशः भवति ?

उत्तरम् -.............................................................................................................|

2. व्यायामेन किं तीव्रम् भवति ?

उत्तरम् -.............................................................................................................|

III. यथानिर्देशं उत्तरत - [1+1=2]

क) 'यः व्यायामं करोति' इत्यत्र क्रियापदं लिखत -

1. यः 2.व्यायामम् 3.करोति 4. किमपि न उत्तरम्- --------------

ख] 'मन्दम्' पदस्य विलोमपदं लिखत -

1. स्वस्थानि 2. दीप्तः 3. तीव्रम् 4. प्रतिदिनम् उत्तरम्- ---------------

## खण्डः 'ख़' लेखनम्-रचनात्मक -(8)

प्रश्नः 2. अधोनिर्मितं चित्रं दृष्ट्वा संस्कृतभाषया चत्वारि वाक्यानि रचयत :- [4]



| | | | | | |
|---|---|---|---|---|---|
| चिकित्सालयः | चिकित्सकः | रुग्णान् | चिकित्सार्थम् | नगरे | परिचरति |
| जनाः | अस्ति | आगच्छन्ति | परिचारिका | ददाति | करोति | औषधम् |

(क) ..............................................................................

(ख) ..............................................................................

(ग) ..............................................................................

(घ) ..............................................................................

Activate

प्रश्नः3. मञ्जूषातः अधोलिखितपदेषु उचितपदानि चित्वा रिक्तस्थानानि पूरयत - [4]

[सूर्यः,स्वस्वकार्यं,विद्यालयम्,पवनः,सुन्दरः,खगाः,मनोहरम्,पुष्पाणि]

प्रातःकालः अति ---------------भवति | वृक्षेषु ---------------मधुरं कूजन्ति| उद्यानेषु ---------------- विकसन्ति | -------------------सुगन्धितः शुद्धः च अस्ति | जनाः भ्रमणाय गच्छन्ति | यदा ------- पूर्वदिशायाम् उदयं गच्छति, तदा दृश्यम् --------------भवति | प्रातः--------------जनाः उल्लासेन कुर्वन्ति |छात्राः प्रसन्नमुखेन ---------------पठनाय गच्छन्ति |सर्वे नवजीवनम् इव अनुभवन्ति |

## खण्डः 'ग'- अनुप्रयुक्त-व्याकरणम् (12)

प्रश्नः4. भिन्नप्रकृतिकं पदं चिनुत :- [4]

क] गच्छति, पठति, धावति, अहसत्, क्रीडति | उत्तरम् :- --------------------|

ख] पत्रम्, मित्रम्, पुष्पम्, आम्रः, नक्षत्रम् | उत्तरम् :- --------------------|

ग] छात्रः, सेवकः, शिक्षकः, लेखिका, क्रीडकः| उत्तरम् :- --------------------|

घ] पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा | उत्तरम् :- --------------------|

प्रश्नः5. अधोलिखितानि पदानि प्रयुज्य संस्कृतभाषया वाक्यानि रचयत-- {4}

क) विद्या- ..........................................................................................|...........|

ख) तपः- ..........................................................................................|...........|

ग) नित्यम्- ..........................................................................................|...........|

घ) समाचरेत्- ..........................................................................................|...........|

प्रश्नः6. अधोलिखितपदानां समानार्थकपदानि कोष्ठकात् चित्वा लिखत :- [4]

[ अवदानम्, अविरतम्, मार्गे, अध्यापने ]

शिक्षणे - -----------------| योगदानम् - -------------------|

पथि - -----------------| निरन्तरम् - --------------------|

## खण्डः 'घ'- पठित-अवबोधनम्       (14)

प्रश्नः7.अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत :- [5]

परमिन्दर् - प्लास्टिकस्य मृत्तिकायां लयाभावात् अस्माकं पर्यावरणस्य कृते महती क्षतिः भवति| पूर्वं तु प्रायःकार्पासेन, चर्मणा, लौहेन, लाक्षया, मृत्तिकया, काष्ठेन वा निर्मितानि वस्तूनि एव प्राप्यन्ते स्म | अधुना तत् स्थाने प्लास्टिक-निर्मितानि वस्तूनि एव प्राप्यन्ते | एतानि अल्पमूल्यानि अपि सन्ति |

वैभवः - आम् घटिपट्टिका, अन्यानि बहुविधानि पात्राणि, कलमेत्यादीनि सर्वाणि तु प्लास्टिक-निर्मितानि भवन्ति |

क] एकपदेन उत्तरत :- [1/2x4=2]

i. कानि वस्तूनि क्षिप्तानि सन्ति ? उत्तरम् :- --------------------|

ii.पर्यावरणस्य कृते का भवति ? उत्तरम् :- --------------------|

iii. कस्य मृत्तिकायां लयः न भवति ? उत्तरम् :- --------------------|

iv. कानि वस्तूनि अल्पमूल्यानि सन्ति? उत्तरम् :- --------------------|

ख] पूर्णवाक्येन उत्तरत - [2]

i. कानि वस्तूनि प्लास्टिक-निर्मितानि भवन्ति?

उत्तरम् -.................................................................................................

.........................................................................................................|...|

ii. पूर्वं प्रायः केन पदार्थेन निर्मितानि वस्तूनि प्राप्यन्ते स्म ?

उत्तरम् -.................................................................................................

.........................................................................................................|...|

ग] भाषिक - कार्यम् :- [1]

'एतानि अल्पमूल्यानि अपि सन्ति' अत्र किम् अव्ययपदम् अस्ति ?

क] एतानि ख] सन्ति ग] अल्पमूल्यानि घ] अपि उत्तरम् :- --------------------|

प्रश्नः8. अधोलिखितम् श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत :- [5]

यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम् |
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ||

क] एकपदेन उत्तरत :- [1x2=2]

i. केषां सम्भवे मातापितरौ क्लेशं सहेते ? उत्तरम् :- --------------------|

ii. क्लेशस्य निष्कृतिः कैरपि कर्तुं न शक्या? उत्तरम् :- --------------------|

ख] पूर्णवाक्येन उत्तरत - [2]

नृणाम् सम्भवे कौ क्लेशं सहेते ?

उत्तरम् :- ---------------------------------------------------------------------------|

ग] भाषिक - कार्यम् :- [1]

'नृणाम्' इत्यत्र का विभक्तिः?

क] द्वितीया ख] षष्ठी ग] तृतीया घ] सप्तमी उत्तरम् :- --------------------|

प्रश्नः9.तद्भवपदानां कृते संस्कृतपदानि कोष्ठकात् चित्वा लिखत :- [4]

[ भगिनी, वंशः, अद्य, सङ्घटनम् ]

आज - ---------------- बहिन - ---------------------

बाँस - ---------------- संगठन - ---------------------

----------------------------x-----------------------x----------------------------